# XX–3245

Seat No. _____

## M. A. (Part – II) Examination

April / May – 2003

## Sanskrit (Entire) : Paper – VIII

(१) छान्दोग्य–उपनिषद्, (२) शिशुपालवधम्

(मल्लिनाथटीकासमेतः प्रथमः सर्गः द्वितीयश्च)

Time : **3** Hours] [Total Marks : **100**

**સૂચના :** દરેક પ્રશ્નની સામેનો અંક ગુણ દર્શાવે છે.

**Instruction :** Figures opposite to every question indicate marks.

१ નીચેનામાંથી ગમે તે **બે** પરિચ્છેદોનો વિવરણ સાથે અનુવાદ કરો : १४

**1** Translate with explanation any **two** of the following : **14**

(१) त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति । प्रजापतिर्लोकानभ्यतपत्ते–भ्योऽभितप्तेभ्यस्त्रयी विद्यासंप्रास्रवत्तामभ्यतपत्तस्या अभितप्ताया एतान्यक्षराणि संप्रास्रवन्त भूर्भुवः स्वरिति । तान्यभ्यतपत्तेभ्योऽभितप्तेभ्य ॐकारः संप्रास्रवत्तद्यथा शङ्कुना सर्वाणि पर्णानि संतृण्णान्येवमोङ्कारेण सर्वा वाक्संतृण्णोङ्कार एवेदं सर्वमोङ्कार एवेदं सर्वम् । (२–२३–१–३)

(२) न वै तत्र न निम्लोच नोदियाय कदाचन । देवास्तेनाहं सत्येन मा विराधिषि ब्रह्मणेति । न ह वा अस्मा उदेति न निम्लोचति सकृद्दिवा हैवास्मै भवति य एतामेवं ब्रह्मोपनिषदं वेद । तद्धैतद् ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यस्तद्धै तदुद्दालकायारुणये ज्येष्ठाय पुत्राय पिता ब्रह्म उवाच । इदं वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात् प्रणाय्याय वान्तेवासिने । नान्यस्मै कस्मैचन यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यादेतदेव ततो भूय इत्येतदेव ततो भूय इति । (३–११–२–६)

(३) एष म आत्मान्तर्हृदयेऽणीयान्व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वैष म आत्मान्तर्हृदये ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः । सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्मान्तर्हृदय एतद्ब्रह्मैतमितः प्रेत्याभिसंभवितास्मीति यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्यः शाण्डिल्यः । (३–१४–३–४)

(४) अथ हाग्नयः समूदिरे तप्तो ब्रह्मचारी कुशलं नः पर्यचारीद्धन्तास्मै प्रब्रवामेति तस्मै होचुः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति । स होवाच विजानाम्यहं यत्प्राणो ब्रह्म कं च तु खं च न विजानामीति ते होचुर्यद्वाव कं तदेव खं यदेव खं तदेव कमिति प्राणं च हास्मै तदाकाशं चोचुः । (४–१०–४–५)

૨ નીચેનામાંથી ગમે તે **ત્રણ** પર ટૂંક નોંધ લખો : ૨૧

**2** Write short notes on any **three** of the following : **21**

(१) शान्तिपाठः

(२) उद्गीथविद्या

(३) चतुष्पाद् ब्रह्म

(४) उपनिषद्

(५) दहरोपासना

(६) इन्द्रविरोचनाख्यायिका ।

૩ છાન્દોગ્ય-ઉપનિષદના આધારે પ્રવાહણ જૈવલિના પાંચ પ્રશ્નો અને તેમના ઉત્તરો સ્પષ્ટ કરો. ૧૫

**3** Elucidate on the basis of the छान्दोग्य–उपनिषद् the questions by प्रवाहण जैवलि and answers to those questions. **15**

**અથવા / OR**

૩ છાન્દોગ્ય-ઉપનિષદના મુખ્ય તત્ત્વચિંતકો અને તેમના તત્ત્વચિંતન વિશે સવિસ્તર નોંધ લખો. ૧૫

**3** Write a detailed note on the philosophers and their philosophy in the Chāndogya-Upaniṣad. **15**

૪ (અ) નીચેનામાંથી ગમે તે **બે**નો અનુવાદ કરો : ૮

**4** (a) Translate any **two** of the following : **8**

(१) निवर्त्य सोऽनुव्रजतः कृतानतीनन्द्रियज्ञाननिधिर्नभःसदः ।
समासदत्सादितदैत्यसंपदः पदं महेन्द्रालयचारु चक्रिणः ॥ (१–११)

(२) सलीलयातानि न भर्तुरभ्रमोर्न चित्रमुच्चैःश्रवसः पदक्रमम् ।
अनुद्रुतः संयति येन केवलं बलस्य शत्रुः प्रशशंस शीघ्रताम् ॥ (१–५२)

(३) ककुद्मिकन्यावक्त्रान्तर्वासलब्धाधिवासया ।
मुखामोदं मदिरया कृतानुव्याधमुद्वमन् ॥ (२–२०)

(४) तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते ।
पञ्चमः पञ्चतपसस्तपनो जातवेदसाम् ॥ (२–५१)

૪ (બ) ગમે તે **બે** સસંદર્ભ સમજાવો : ૬

**4** (b) Explain with reference to the centext any **two** of the following : **6**

(૧) शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम् ।

(२) बहिर्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः ।

(३) ज्ञातसारोऽपि खल्वेकः सन्दिग्धे कार्यवस्तुनि ।

(४) इन्धनौघधगप्यग्निस्त्विषा नात्येति पूषणम् ।

૪ (ક) ગમે તે **એક** ખંડનું સાનુવાદ વિવરણ આપો : ૧૦

**4** (c) Translate with explanation any **one** of the following : **10**

(१) पिशङ्गमौञ्जीयुजमर्जुनच्छविं वसानमेणाजिनमञ्जनद्युति ।
सुवर्णसूत्राकलिताधराम्बरां विडम्बयन्तं शितिवाससस्तनुम् ॥ (१–६)
पुनः कीदृशम् । मुञ्जतृणविशेषः तन्मयी मेखला मौञ्जी । पिशङ्गया मौञ्ज्या युज्यत इति पिशङ्गमौञ्जीयुक् तम् । सत्सूद्विष..... इत्यादिना क्विप् । 'स्त्रियाः पुंवत्....' इति पिशङ्गशब्दस्य पुंवद्भावः । अर्जुनच्छविं धवलकान्तिम् । 'वलक्षो धवलोऽर्जुनः' इत्यमरः अञ्जनद्युत्यञ्जनवर्णं एणाजिनं कृष्णमृगचर्मवसानमाच्छादयन्तम् । 'वस आच्छादने' इजि धातोः शानच् । सुवर्णसूत्रेण कनकमेखलया आकलितं बद्धमधराम्बरमन्तरीयकं यस्यास्तां शितिवाससो नीलाम्बरस्य रामस्य तनुं विडम्बयन्तम् । अनुकुर्वाणमित्यर्थः । आर्थीयमुपमा ।

(२) रथाङ्गपाणेः पटलेन रोचिषामृषित्विषः संवलिता विरेजिरे ।
चलत्पलाशान्तरगोचरास्तरोस्तुषारमूर्तेरिव नक्तमंशवः ॥ (१–२१)
रथाङ्गं चक्रं पाणौ यस्य तस्य हरेः । 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः' इति पाणेः परनिपातः । रोचिषां छवीनां पटलेन समूहेन संवलिता मिलिता ऋषित्विषो । नक्तं रात्रौ । सप्तम्यर्थेऽव्ययम् । तरोश्चलतां पलाशानां पत्राणामन्तराणि विवराणि गोचर आश्रयो येषां ते । तुषारा मूतिर्यस्य तस्येन्दोरंशव इव विरेजिरे चकाशिरे ।

૫ ‘શિશુપાલવધ’ પરની મલ્લિનાથની સર્વંકષા ટીકાની વિશિષ્ટતાઓ નિરૂપો. ૧૪

**5** Elucidate the specialities of the commentary सर्वंकषा by Mallinatha on शिशुपालवधम्. **14**

**અથવા / OR**

૫ મહાકાવ્યનાં લક્ષણો આપી શિશુપાલવધનું મહાકાવ્ય તરીકે મૂલ્યાંકન કરો. ૧૪

**5** Evaluate शिशुपालवध as a महाकाव्य giving characteristics of a महाकाव्य. **14**

૬ ગમે તે **બે** વિશે ટૂંક નોંધ લખો : ૧૨

**6** Write a short note on any **two** : **12**

(૧) નારદનું ભૂમિ પર અવતરણ-વર્ણન

(1) Description of Nārada's descending on earth

(૨) ભારવિ-માઘની તુલના

(2) Comparison between Bharavi and Magha

(૩) શિશુપાલનાં પૂર્વાવતારનાં દુષ્કૃત્યો

(3) Misdeeds of शिशुपाल in his former births

(૪) માઘનું જીવન.

(4) Life of Māgha.